© 2017 IJSRSET | Volume 3| Issue 1 | Print ISSN: 2395-1990 | Online ISSN : 2394-4099

# संस्कृत साहित्ये जलस्य महत्त्वम्



डॉ. दीपमाला उपाध्याय
भूतपूर्व शोधछात्रा, साहित्य विभाग,
सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी,
उत्तर प्रदेश,भारत।

विश्वस्य निखिलायाश्चेतनात्मिका: प्रकृते: संरक्षणार्थं अस्माकम् भारतीया: महर्षय: सदविचाराचारयोर्महत्वम् प्रतिपादयन्त: सर्वभूतानाम् हितकामनायै: प्राच्यविधायै मूलस्तम्भ रुपेणाङ्गी कृतवन्तम् साम्प्रतम् सम्पूर्णऽस्मिन संसारे पर्यावरणसंरक्षस्य या चर्चा प्रचलति। अस्माकम् चत्वार: वेदा: सर्वा उपनिषद् , पुराणानि,समस्तानि प्राच्यनत्यसंस्कृत साहित्यानि च सर्वदैव सन्नद्धानि सन्ति । भारतीय प्राच्य विद्यासु मानवानाम् सर्वविध कल्याण वनौषधिनाम् पदपानाम् ,पर्वतानां, वन्यप्राणिनां चानिर्वायता,तेषां सुरक्षोपायोश्च समुपदिष्टा वर्तन्ते।

अस्माकं भारतीय संस्कृतौ सर्वेष्वारम्भकार्येषु बाह्यभ्यन्तरयों: शुचित्व सम्पादनाय भगवान पुण्डरीकाक्ष: स्मर्यते ।

**यथोक्तम्-**

**अपवित्र: पवित्रो वा सर्वावस्थाङ्गतोऽपि वा ।**

**य: स्मरेत् पुण्डरीकाक्ष: स बाह्याभ्यन्तर शुचि: ।।**

भारतीयैर्वैदिकैर्विज्ञानिकैर्धूम विज्ञानमाध्यमेन शुद्धवायुना भूमण्डलस्य सर्वभूतानि वनस्पतीन, अग्निम् , जलम्,स्थले च रक्षयितुम् प्रदूषित वातावरण परिशोधयितुं च प्रतिगृहम् यज्ञस्योपयोगिता प्रदर्श्यते ।

**जलम् (पर्यावरण ) -** वस्तुत: यस्य पर्यावरणस्य तद्रक्षणस्य च महती आवश्यकता सम्प्रत्यनुभूयते तस्य विभवसमतोलनस्याधार: जलमेव । अमरकोश जलस्य सप्तविंशति नामानि निरुक्ते एकाधिकशतनामान्यु लिखितानि संस्कृत साहित्ये विविधरुपेषु जल परिभाषितम् । ब्रह्मरुपेण, मधुरुपेण ,अमृतरुपेण ,प्राणरुपेण ,रसरुपेण ,द्रव्यरुपैणेति ।

"वर्ण: शुक्लो रसस्पर्शौ जले मधुरशीतलौ"।

**जलालाभा:** –

**"आपो वाहन्तीह हि लोकयात्राम् ,यथा न भूतानि तथाऽपराणि"।।**

महाकविना श्रीहर्षेण दमयन्तीस्वयंबर प्रसङ्गे तथ्यामिदम् सहजतया प्रतिपादितम्। प्राणवायुना अवशोषितम् वायुमंडलीय जलंश्वासेव स्वीकृत्य जलरूपप्राणम् विभर्ति जीव: । पीतस्य जलस्य च सूक्ष्मांश प्राणो भवति रसरुपं

शरीरं पोषयति, पानेन पिपासा नाशयति रुग्णाय औषधम् भवति ,स्नानादिना शरीर पावयति। चाणक्यादेन पृथिव्यां , रत्नभूतेषू त्रिषु तत्वेषु प्रथम जलमुद्दिष्टम्–

**"पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम्।"**

जलस्य लाभाः न गणयितु शक्यन्ते । जीवानां जीवनं जलमिति जीवनस्य पर्यायत्वेन गृह्यते। लाभानाम सुखोपभोगः जलं च सर्वथा सुखोपभोग्यं भवति ।

**"उदकेन यद्दीयते सुखादिकं तच्चान्यै, पृथिव्यांदिभिः दातुमशक्यत्वात्"।**

अस्माकं भारतीयशास्त्रे उषापानं रहस्यं वैज्ञानिक वर्तते। कारणम् ताम्रपात्र विधानेन जलस्था ऊर्जा विकीर्णा न भवति । यतोहि ताम् संयोगेन पृथिव्या न संक्रमते । काष्ठम् हि विद्युतः कुचालकम् अतएव पद्मपुराणेऽपि जलस्य गुणाः कथ्यते–

**"जलं गण्डूष तु पीत्वा पतो भवेन्नरः, विशेषात्कुश संसर्गात्पीयूषादिकं जलम्"।**

**वानस्पतिक –पर्यावरणम् –**

वानस्पतिक पर्यावरणस्य संघटक वृक्षपादपः वनानि वनस्पतयः सस्यश्चेति जलं वनस्पतेर्योनि इत्युक्तम् । वर्षारूपजलं पर्यावरणस्य समृद्धयऽमृतभूतं भवति । वर्षाजलस्य अशभूतं पृथिवीतले परीवाहादि मार्गेण नदीषु ततश्च समुद्रे मिलति।

**पर्यावरण संदर्भे जलसंरक्षणम्-** संस्कृते साहित्ये धर्मशास्त्रे दैनिकाचारे, कर्तव्यधर्माणाम् संग्रहे पर्यावरणस्य संरक्षणस्य ,नैत्यिकविधानमस्ति , संदर्भे अस्मिन पद्मपुराण ,मनुस्मृतौ ,विदुरनीतौ ,चाणक्यनीतौ अन्यत्र च केचनमानवधर्माः उक्ताः तदनुसार नदीतटे समुद्रतटे जलाशयानां समीपे अमेध्यानां पदार्थानां विसर्जन निषिद्धमस्ति।

वर्तमान समये महद्कष्टकरमिदं तथ्यं यत् सार्वजनिकजलस्नानेषु अमेध्य पदार्थानां विसर्जनम् न सङ्कोच अनुभवन्ति जनाः । गङ्गा सदृशा पवित्र नदी अपि प्रदूषिता वर्तते। जलम् स्वभावतः शोधकं पवित्रम् पावकञ्च भवति । अतस्तस्य पवित्रतायाः रक्षणम् मानवमात्रस्य कर्तव्यम् जलीय पर्यावरणमस्य संरक्षणाय च संस्कृत साहित्ये भारतीय संस्कृतेः मूलभूताः तीर्थस्य अवधारणा उपस्थापिताः जलसंरक्षणस्य साक्षात् संबंधः पूर्वकर्मणा भवति ।

अग्निपुराणे पूर्वधर्ममुक्ति प्रदम् उक्त्वा वापी कुपादि तदन्तर्गत स्वीकृतम्–

**वापीकूपतडागानि देवतायतवनानि च। अन्न प्रदानमाराभाः पूर्वधर्मम् च मुक्तिदम्।।**

श्रीमद्भगवद्गीतायाम् अपि कथ्यते–

**"यज्ञाद्भवति पर्जन्यः पर्जन्यादन्नसंभवः" ।**

मत्स्यपुराणे ,भागवतपुराणे च मयासुरेण निर्मिताया विशालतरायाः वाप्याः उल्लेखः प्राप्यते।

**"मयया संसृजे वापी रम्भामिव पितामहः ।"**

बाल्मीकिरामायणे भरतकृत राज्यव्यवस्थान्तर्गतं तस्य जलसंरक्षण प्रवृतिः उक्ताः –

**"आचिरेण तु कालेन परिवाहान वहूदकान्, चक्रुर्बहुविधाकारान् सागर प्रतिभान् बहून्।"**

अतः उपलब्ध जलस्य उपयोगाय विविधजलाधारणा निर्माण तेषु जलसंरक्षणञ्च यथावश्यकम् भवति ,तस्य संवर्धनमपि तथैवाश्यकम् यदि प्रबुद्धाः जनाः न सावधानाः भविष्यति चेत्तहि जलपरिमाणम् यथापेक्षितम् न लप्स्यते।

**संदर्भ सूची –**


1. **अमरकोशः**
2. **निरुक्त**
3. **नैषधचरितम्**
4. **चाणक्यनीति**
5. **शब्दकोशः**
6. **पद्मपुराण**
7. **मनुस्मृतिः**
8. **अग्निपुराण**
9. **मत्स्यपुराण**
10. **बाल्मीकिरामायण**